# Government General Degree College at Ranibandh

## Rautora, Ranibandh, Bankura - 722135

## Sanskrit Department

## Study Material for Honours

## 1st Year 2nd Semester

## Paper – Poetics And Literary Criticism (C-3)

## Unit 1 – Sahityadarpana 6th Chapter

# साहित्यदर्पणः - षष्ठपरिच्छेदः

## १) नाटकम्

साहित्यदर्पणस्य षष्ठपरिच्छेदे दृश्यकाव्यवर्णनावसरे दृश्यकाव्यस्य रूपकस्य दश भेदाः उपन्यस्ताः। अत एवोक्तं -

**"नाटकमथ प्रकरणं भाणव्यायोगसमवकारडिमाः।**

**ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश।।"** इति।

एतेषु दशसु रूपकेषु नाटकस्य स्वरूपम् अधः आलोच्यते। प्रकरणस्य लक्षणं प्रोक्तं साहित्यदर्पणे -

**"नाटकं ख्यातवृत्तं स्यात्पञ्चसन्धिसमन्वितम्।**

**विलासर्द्ध्यादिगुणवद् युक्तं नानाविभूतिभिः।।**

**सुखदुःखसमुद्भूतिनानारसनिरन्तरम्।**

**पञ्चादिका दशपरास्तत्राङ्काः परिकीर्तिताः।।"** इति।

नाटकनामके दृश्यकाव्ये इतिवृत्तं प्रसिद्धं भवति। नाटके मुखं प्रतिमुखं गर्भः विमर्ष उपसंहृतिश्चेति पञ्च सन्धयः भवन्ति। विलासः धीरा दृष्टिः, ऋद्धिः काचिद् उन्नतिः इत्यादिगुणयुक्तं नायकद्वारा भवति नाटकम्। तच्च बहुविधसम्पद्भिः युक्तम्। तद् हि सुखदुःखयोः समुत्पत्त्या नानाविधैः शृङ्गारादिरसैः परिपूर्णम्। नाटके पञ्चतः दशमध्ये अङ्काः स्युः। पुनः नाटके नायकस्य वैशिष्ट्यं कथयति विश्वनाथः -

**"प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान्।**

**दिव्योऽथ दिव्यादिव्यो वा गुणवान्नायको मतः।।"** इति।

सद्वंशोत्पन्नः, राजा एव ऋषिः राजर्षिः, प्रतापवान् धीरोदात्तः दिव्यः दिव्यादिव्यो वा गुणवान् नायकः भवति नाटकस्य। दिव्यः नाम स्वर्गीयः। दिव्यादिव्यो नाम यः दिव्यः अपि अदिव्यः नराभिमानी। अत्र राजर्षिः नायकः यथा अभिज्ञानशाकुन्तले दुष्यन्तः। दिव्यः नायकः यथा श्रीकृष्णः। दिव्यादिव्यो नायकः तावत् श्रीरामचन्द्रः।

**"एक एव भवेदङ्गी शृङ्गारो वीर एव वा।**

**अङ्गमन्ये रसाः सर्वे कार्यो निर्वहणेऽद्भुतम्।।"** इति नाटके रसस्य वैशिष्ट्यम्।

नाटके एक एव प्रधानो रसो भवति शृङ्गारः अथवा वीरः। अन्ये सर्वे रसा अङ्गभूता भवन्ति। निर्वहणसन्धौ अद्भुतरसः स्थापनीय इति नाटकस्य रसविषये वैशिष्ट्यम्।

नाटके चत्वारि पञ्च वा पात्राणि मुख्यानि भवन्ति। नाटकस्य बन्धनं गोपुच्छाग्रसमाग्रं भवति। केषाञ्चिन्मते नाटके अङ्काः क्रमेण लघवः भवन्ति। केषाञ्चिच्च नये यथा गोपुच्छाग्रे केशाः केचिद् ह्रस्वाः केचिद् दीर्घाः तथैव नाटके कानिचिन इतिवृत्तानि मुखसन्धौ, कानिचन प्रतिमुखे एवम्प्रकारेण समाप्तानि भवन्ति। तथाहि विश्वनाथः कथयति -

**"चत्वारः पञ्च वा मुख्याः कार्यव्यापृतपुरुषाः।**

**गोपुच्छाग्रसमाग्रं तु बन्धनं तस्य कीर्तितम्।।"** इति।

अभिज्ञानशाकुन्तलम् उत्तररामचरितम् इत्यादिकं नाटकस्योदाहरणम्। एवं समासेन नाटकलक्षणं वर्णितमिति शम्।

## २) अर्थोपक्षेपकाः

साहित्यदर्पणस्य षष्ठपरिच्छेदे दृश्यकाव्यवर्णनावसरे अर्थोपक्षेपकस्य पर्यालोचनं विश्वनाथेन विहितम्। नाट्यवस्तु सूच्यासूच्यभेदेन द्विविधम्। नाटके दूराह्वानं वधो युद्धं तथा अन्यानि अपि कानिचन वस्तूनि सन्ति यानि न दर्शनीयानि। तानि असूच्यानि भवन्ति। तथापि नाटकीयकथासूत्रस्य निरवच्छिन्नतारक्षणाय कदाचित् तेषां शास्त्रनिषिद्धानां विषयाणां वर्णना अपेक्षिता। तदा ते विषया अर्थोपक्षेपकैः एव सूचनीयाः इति नाट्यशास्त्रकाराणां मतम्।

अर्थान् सरसवृत्तान्तान् उपक्षिपन्ति उपस्थापयन्ति ये ते अर्थोपक्षेपकाः। तथाहि युद्धादयः अङ्केषु अदर्शनीयाः कथाः, याः वर्षपर्यन्तं कथाः, याश्च कथाः दिनद्वयपर्यन्ताः ताः सर्वाः कवयः अर्थोपक्षेपकद्वारा सूचयन्ति।

अर्थोपक्षेपकाः कति सन्तीति चेदुच्यते विष्कम्भकः प्रवेशकः चूलिका अङ्कावतारः अङ्कमुखम् इति पञ्च सन्ति।

**क) विष्कम्भकः -** प्रथमस्य अर्थोपक्षेपकस्य विष्कम्भकस्य लक्षणमाह -

**"वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः।**
**संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः।।"** इति।

वृत्ताः अतीताः, वर्तिष्यमाणाः भाविनश्च ये कथांशाः वृत्तान्तभागाः तेषां प्रकाशकः, संक्षिप्तार्थः अङ्कापेक्षया स्वल्पप्रसारः, अङ्कस्य आदौ प्रथमे दर्शितः प्रयोजितः भवति विष्कम्भको नाम अर्थोपक्षेपकः।

स च विष्कम्भकः शुद्धः मिश्रश्चेति द्विविधः। तत्र मध्यमश्रेणीभुक्तेन एकेन पात्रेण मध्यमाभ्यां वा पात्राभ्यां सम्प्रयोजितः विष्कम्भकः शुद्धो भवति। यः विष्कम्भकः नीचेन मध्यमेन च पात्रेण सम्प्रयोजितः स मिश्रः भवति। तथाह्युक्तं साहित्यदर्पणे -

**"मध्येन मध्यमाभ्यां च पात्राभ्यां सम्प्रयोजितः।**
**शुद्धः स्यात्स तु सङ्कीर्णो नीचमध्यमकल्पितः।।"** इति।

तत्र शुद्धः विष्कम्भको यथा मालतीमाधवे श्मशाने मध्यमपात्रस्य कपालकुण्डलायाः वृत्तान्तः। सङ्कीर्णविष्कम्भकः तावत् रामाभिनन्दनाटके दृश्यते। तत्र मध्यमपात्रेण क्षपणकेन सह नीचपात्रस्य कापालिकस्य कथालापः। शुद्धः संस्कृतेन मिश्रः संस्कृतेन प्राकृतेन च प्रयुज्यते।

**ख) प्रवेशकः -** द्वितीयस्य अर्थोपक्षेपकस्य विष्कम्भकस्य लक्षणमाह -

**"प्रवेशकोऽनुदात्तोक्त्या नीचपात्रप्रयोजितः।**
**अङ्कद्वयान्तर्विज्ञेयः शेषं विष्कम्भके यथा।।"** इति।

प्रवेशयति परवर्तिपात्रविशेषप्रवेशं सूचयति इति प्रवेशकः। अङ्कद्वयस्य मध्ये अनुदात्तोक्त्या संस्कृतेतरभाषया नीचपात्रप्रयोजितः द्वाभ्यां नीचपात्राभ्यां बहुभिः नीचपात्रैः वा प्रयोजितः रूपकस्य अंशविशेषो भवति प्रवेशकः अर्थोपक्षेपकः। शेषं विष्कम्भके यथा इत्यनेन प्रवेशकः अपि वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः संक्षिप्तार्थश्च भवति।

अङ्कद्वयस्य अन्तः मध्ये प्रवेशकः तिष्ठति इति कथनेन प्रथमाङ्के प्रवेशकस्य निषेधः। प्रवेशकस्य उदाहरणं यथा वेणीसंहारे अश्वत्थामाङ्के राक्षसद्वयस्य कथोपकथनम्। अत्र राक्षसद्वयं नीचपात्रम्, तयोः कथोपकथनं च संस्कृतेतरभाषया।

**ग) चूलिका -** तृतीयस्य अर्थोपक्षेपकस्य चूलिकारूपस्य लक्षणमाह -

**"अन्तर्जवनिकासंस्थैः सूचनाऽर्थस्य चूलिका।"** इति।

वृत्तविशेषस्य चूडारूपा भवति चूलिका। अन्तर्जवनिकासंस्थैः तिरस्करिण्या विद्यया अन्तराले स्थितैः पात्रैः अर्थस्य वृत्तान्तविशेषस्य सूचना भवति चूलिकानामकः अर्थोपक्षेपकः।

यथा महावीरचरिते नाटके चतुर्थाङ्कस्य आदौ नैपथ्ये "भो भो वैमानिकाः, प्रवर्त्यन्तां मङ्गलाचरणानि" इत्यादिकं श्रूयते। ततः ज्ञायते यत् "रामेण परशुरामो जितः" इति। एवं नैपथ्यस्थितेन पात्रेण परशुरामजयस्य सूचनात्सा भवति चूलिका।

**घ) अङ्कावतारः -** चतुर्थस्य अर्थोपक्षेपकस्य अङ्कावतारस्य लक्षणमाह -

**"अङ्कान्ते सूचितः पात्रैस्तदङ्कस्याविभागतः।**

**यत्राङ्कोऽवतरत्येषोऽङ्कावतार इति स्मृतः।।"** इति।

अङ्गभावेन अङ्कः अङ्कान्तरम् अवतरति आविर्भवति इति अङ्कावतारः। अङ्कान्ते यस्य कस्यचिद् अङ्कस्य अवसाने पात्रैः तस्य अङ्कस्य अविभागतः अभेदेनः सूचितः सम्प्रयोजितः यत्र अङ्कः अवतरति आविर्भवति एषः अङ्कावतारः इति अर्थोपक्षेपकः।

यथा अभिज्ञानशाकुन्तले पञ्चमाङ्के श्यालकात् धीवरसम्प्राप्तम् अङ्गुरीयकं दृष्ट्वा राजा शोकाकुलः अभवत्। पञ्चमाङ्के प्रोक्तः स एव शोकः षष्ठाङ्के अपि विद्यते। एवं षष्ठाङ्कः पञ्चमाङ्कस्य अङ्गतयावतरतीति अङ्कावतारः।

**ङ) अङ्कमुखम् -** पञ्चमस्य अर्थोपक्षेपकस्य अङ्कमुखस्य लक्षणमाह -

**"यत्र स्यादङ्क एकस्मिन्नङ्कानां सूचनाखिला।**

**तदङ्कमुखमित्याहुर्बीजार्थख्यापकं च तत्।।"** इति।

अङ्कानां विषयसूचनद्वारा मुखम् आद्यम् इति अङ्कमुखम्। यत्र एकस्मिन् अङ्के सर्वेषाम् अङ्कानां सम्पूर्णा सूचना प्राप्यते तद् आलङ्कारिकाः अङ्कमुखम् इति नाम्ना वदन्ति। तच्च अङ्कमुखम् बीजार्थस्य सूचकं भवति।

यथा मालतीमाधवे प्रथमाङ्के कामन्दक्या सह अवलोकितायाः कथोपकथने भाविपात्राणां भूरिवसुप्रभृतीनां तथा सर्वेषाम् एव अङ्कानां संक्षिप्तः वृत्तान्तः सूचितः। अतः अत्र अङ्कमुखनामकः अर्थोपक्षेपकः।

धनिकस्य मते तु अङ्कमुखस्य अन्यत् लक्षणमस्ति। तस्य एव लक्षणं विश्वनाथः कथयति -

**"अङ्कान्तपात्रैर्वाङ्कास्यं छिन्नाङ्कस्यार्थसूचनात्।"** इति।

अङ्कान्तपात्रैः अङ्कस्य अन्तिमे प्रविष्टैः पात्रैः छिन्नस्य विभक्तस्य परवर्तिनः अङ्कस्य अर्थसूचनाद् विषयप्रकाशाद् अङ्कमुखं भवति इति धनिकः। परन्तु एतल्लक्षणम् अङ्कावतारस्य न तु अङ्कमुखस्य इति विश्वनाथः।

## ३) अर्थप्रकृतयः

साहित्यदर्पणस्य षष्ठपरिच्छेदे दृश्यकाव्यवर्णनावसरे अर्थप्रकृतेः पर्यालोचनं विश्वनाथेन विहितम्। का नाम अर्थप्रकृतिः इति प्रश्ने रूपके अर्थस्य मूलप्रयोजनस्य सिद्धिहेतुः भवति अर्थप्रकृतिः। अर्थप्रकृतयः हि प्रयोजनसिद्धिहेतवः। ताः पञ्च भवन्ति - बीजम्, बिन्दुः, पताका, प्रकरी कार्यञ्च। तासां सर्वासां वर्णनमधः विधीयते -

**क) बीजम् -** बीजस्य किं लक्षणम् इति चेदाह विश्वनाथः -

**"अल्पमात्रं समुद्दिष्टं बहुधा यद्विसर्पति।**
**फलस्य प्रथमो हेतुर्बीजं तदभिधीयते।।"** इति।

यद् अल्पमात्रं समुद्दिष्टं प्रथमम् अङ्कुरितरूपेण प्रदर्शितं सत् बहुधा क्रमिक-सहकारि-कारणसम्पर्केण विसर्पति क्रमशः विस्तारं गच्छति तथा फलस्य नायकस्य मुख्योद्देश्यस्य यः प्रथमः हेतुः आदिमं कारणं तद् भवति बीजम्।

बीजस्य उदाहरणं यथा रत्नावल्यां वत्सराजस्य उदयनस्य रत्नावलीप्राप्तेः हेतुः भवति दैवानुकूलतया कृतः प्रधानामात्यस्य यौगन्धरायणस्य वासवदत्तायाः अन्तःपुरे रत्नावल्याः स्थापनादिव्यापारः। अत्र रत्नावल्यां यौगन्धरायणव्यापारः भवति बीजं रत्नावलीप्राप्तिश्च मुख्यं फलम्। एवमेव दृश्यते वेणीसंहारे द्रौपद्याः केशसंयमनस्य हेतुः भीमस्य क्रोधेन उद्दीप्तस्य युधिष्ठिरस्य उत्साहः। अत्र द्यौपद्याः केशसंयमनं मुख्यं फलं तस्य हेतुः युधिष्ठिरस्योत्साहश्च बीजम्।

**ख) बिन्दुः -** बिन्दोः किं लक्षणम् इति चेदाह विश्वनाथः -

**"अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणम्।"** इति।

अवान्तरस्य समग्रवृत्तान्तस्य एकभागस्य विच्छेदे समाप्तित्वेन विरामे प्राप्ते अच्छेदकारणं परवर्तिवृत्तान्तभागस्य आकाङ्क्षोत्पादनेन अविरामस्य हेतुः भवति बिन्दुः।

यथा रत्नावलीनाटिकायां कामदेवस्य पूजायां समाप्तायां कथायाः विच्छेदो भवति। तदा "उदयनस्येन्दोरिवोद्वीक्षते" इति सागरिका श्रुत्वा सहर्षं कथयति "कथमेष स उदयननरेन्द्रः" इति। एतत्कथनमेव परवर्तिवृत्तान्तसूचनाद्वारा अविरामस्य हेतुः। अतः एतद्वच एव बिन्दुः।

**ग) पताका -** पताकाया किं लक्षणम् इति चेदाह विश्वनाथः -

**"व्यापि प्रासङ्गिकं वृत्तं पताकेत्यभिधीयते।"** इति।

व्यापि उपसंहारपर्यन्तं स्थायि प्रासङ्गिकं प्रसङ्गत उपस्थितं वृत्तम् इतिवृत्तं पताका इत्युच्यते। यथा उत्तररामचरिते सुग्रीवादेः, वेणीसंहारे भीमादेः अभिज्ञानशाकुन्तले च विदूषकस्य चरितं भवति पताका।

पताका इत्यस्मिन् अंशे यस्य चरितं वर्ण्यते स एव पताकानायकः भवति। पताकानायकस्य प्रयोजनप्रतिपादनाय पताका नैव उपयुज्यते। यतो हि गर्भसन्धौ विमर्षसन्धौ वा पताकानायकस्य स्वकीयफलप्राप्तिः भवति। परन्तु ततः परमपि तस्य चरितं समाप्तिपर्यन्तम् अनुवर्तते। तथाहि अत्र विश्वनाथः -

**"पताकानायकस्य स्यान्न स्वकीयफलान्तरम्।**
**गर्भे सन्धौ विमर्षे वा निर्वाहस्तस्य जायते।।"** इति। यथा सुग्रीवस्य राजप्राप्त्यादिः प्रयोजनम्।

**घ) प्रकरी -** प्रकर्याः किं लक्षणम् इति चेदाह विश्वनाथः -

**"प्रासङ्गिकं प्रदेशस्थं चरितं प्रकरी मता।"** इति।

प्रासङ्गिकं नायकचरिते प्रसङ्गत उपस्थितं प्रदेशस्थम् एकदेशमात्रे वर्तमानं चरितम् इतिवृत्तं भवति प्रकरी। अर्थात् प्रासङ्गिकम् इतिवृत्तं यदा बहुदेशवृत्ति तदा पताका यदा एकदेशवृत्ति तदा प्रकरी। यथा कुलपत्यङ्के जटायुसंवादः।

प्रकरीनायकस्य स्वकीयं किमपि प्रयोजनं नास्ति अपि तु नायकफलस्य एव साधिका प्रकरी। तथाहि विश्वनाथः कथयति -

**"प्रकरीनायकस्य स्यान्न स्वकीयं फलान्तरम्।"** इति।

**ङ) कार्यम् -** कार्यस्य किं लक्षणम् इति चेदाह विश्वनाथः -

**"अपेक्षितन्तु यत्साध्यमारम्भो यन्निबन्धनः।**
**समापनन्तु यत्सिद्ध्यै तत् कार्यमिति सम्मतम्।।"** इति।

यद् अपेक्षितं कर्तुम् आकाङ्क्षितम्, यत्साध्यं स्वशक्त्या शक्यम्, यन्निबन्धनः यद् उद्दिश्य आरम्भः प्रथमप्रवृत्तिः, यस्य च सिद्ध्ये साधनाय समापनम् उपायसंग्रहः तत् कार्यं भवति।

यथा रामचरिते रावणवधः कार्यं भवति। समग्रं नाटकम् अभिव्याप्य रावणवधस्य एव प्रस्तुतिः विधीयते रावणवधेन एव नाटकं समाप्यते अतः रावणवधः कार्यं भवति।

एवं समासेन पञ्च अर्थप्रकृतयः अत्र वर्णिताः।

## ४) सन्धयः

साहित्यदर्पणस्य षष्ठपरिच्छेदे दृश्यकाव्यवर्णनावसरे अवस्थानां पर्यालोचनं विश्वनाथेन विहितम्। तत्र प्रतिपादितं यत् पञ्चानाम् अवस्थानां योगाद् इतिवृत्तस्य पञ्च भागाः सन्धयः भवन्ति। तथाहि कथयति विश्वनाथः -

**"यथासंख्यमवस्थाभिराभिर्योगात्तु पञ्चभिः।**
**पञ्चधैवेतिवृत्तस्य भागाः स्युः पञ्च सन्धयः।।"** इति।

ततः सन्धिस्वरूपमाह विश्वनाथः -

**"अन्तरैकार्थसम्बन्धः सन्धिरेकान्वये सति।"** इति। अर्थाद् एकेन मुख्यप्रयोजनेन अन्वये सति अन्वितानां वृत्तान्तांशानां यः अवान्तरप्रयोजनेन सह सम्बन्धः स एव सन्धिः भवति। सन्धेः मुखं प्रतिमुखं गर्भः विमर्ष उपसंहृतिः इति पञ्च भेदाः सन्ति। तेषां भेदानां वर्णनमधः समासेन विधीयते -

**क) मुखसन्धिः -** सन्धिषु प्रथमो भवति मुखसन्धिः। तस्य लक्षणं साहित्यदर्पणे -

**"यत्र बीजसमुत्पत्तिर्नानार्थरससम्भवा।**
**प्रारम्भेण समायुक्ता तन्मुखं परिकीर्तितम्।।"** इति।

यत्र सन्धौ नानार्थरससम्भवा प्रारम्भेण समायुक्ता बीजसमुत्पत्तिः भवति स मुखसन्धिः। बीजस्य सम्यक्तया उत्पत्तिः एव बीजसमुत्पत्तिः। सा बीजसमुत्पत्तिः बहुविधैः वृत्तान्तैः शृङ्गारादिरसैः सम्बद्धा। बीजसमुत्पत्तिः पुनः प्रारम्भनामिकया अवस्थया समायुक्ता भवति। सा बीजसमुत्पत्तिः यत्र भवति तदेव मुखसन्धिः।

मुखसन्धेः उदाहरणं तावद् रत्नावल्यां प्रथमाङ्के। वत्सराजेन उदयनेन सह रत्नावल्याः परिणयः अत्र मुख्यं फलम्। तस्य फलस्य प्रथमो हेतुः बीजं भवति रत्नावल्याः उदयनस्य च परस्परानुरागः। एतद्बीजं प्रथमाङ्के मुखसन्धौ एव प्रकाशते।

**ख) प्रतिमुखसन्धिः -** सन्धिषु द्वितीयो भवति प्रतिमुखसन्धिः। तस्य लक्षणं साहित्यदर्पणे -

**"फलप्रधानोपायस्य मुखसन्धिनिवेशिनः।**

**लक्ष्यालक्ष्य इवोद्भेदः यत्र प्रतिमुखं च तत्।।"** इति।

यत्र सन्धौ मुखसन्धिनिवेशिनः मुखसन्धौ उत्पन्नस्य फलप्रधानोपायस्य फलस्य मुख्यप्रयोजनस्य यः प्रधानो हेतुः तस्य लक्ष्यालक्ष्य ईषद्विज्ञेयः इव उद्भेदः प्रकाशो भवति स प्रतिमुखसन्धिः भवति।

यथा हि रत्नावल्यां प्रतिमुखसन्धिः द्वितीयाङ्के। प्रथमाङ्के उदयनस्य रत्नावल्याः च समागमहेतुः अनुरागः सूचितः। ततः द्वितीयाङ्के सुसङ्गताविदूषकाभ्यां सः अनुरागः ज्ञातः वासवदत्तया चित्रदर्शनेन सः अनुरागः अनुमितश्च। तेन फलप्रधानोपायस्य अनुरागस्य किञ्चित् प्रकाशः अत्र जातः इति प्रतिमुखसन्धिः।

**ग) गर्भसन्धिः -** सन्धिषु तृतीयो भवति गर्भसन्धिः। तस्य लक्षणं साहित्यदर्पणे -

**"फलप्रधानोपायस्य प्रागुद्भिन्नस्य किञ्चन।**

**गर्भो यत्र समुद्भेदो ह्रासान्वेषणवान् मुहुः।।"** इति।

यत्र सन्धौ प्राक् पूर्वस्मिन् सन्धिद्वये किञ्चन उद्भिन्नस्य किञ्चित्प्रकाशं प्राप्तस्य फलप्रधानोपायस्य फलस्य मुख्यहेतोः मुहुः पुनः पुनः ह्रासान्वेषणवान् क्षीणभावानुसन्धानवान् समुद्भेदः प्रकाशो भवति स गर्भनामकः सन्धिः।

यथा रत्नावल्यां द्वितीयाङ्के सुसङ्गता - "सखि, अदक्षिणा इदानीमसि त्वम्, या एवं भर्त्रा हस्तेन गृहीतापि कोपं न मुञ्चसि" इत्यादौ अनुरागस्य प्रकाशो दृश्यते। पुनः वासवदत्ताप्रवेशे अनुरागस्य ह्रासो भवति। एवमेव तृतीयाङ्के अनुरागस्य विकाशः ह्रासश्च अवलोक्यते।

**घ) विमर्षसन्धिः -** सन्धिषु चतुर्थो भवति विमर्षसन्धिः। तस्य लक्षणं साहित्यदर्पणे -

**"यत्र मुख्यफलोपाय उद्भिन्नो गर्भतोऽधिकः।**

**शापाद्यैः सान्तरायश्च स विमर्ष इति स्मृतः।।"** इति।

यत्र सन्धौ मुख्यप्रयोजनस्य हेतुः गर्भतः गर्भसन्धेः अपेक्षया अधिकः उद्भिन्नः प्रकाशितो भवति, अथ च शापाद्यैः बाधादिभिः सान्तरायः व्यवधानं प्राप्नोति स विमर्षसन्धिः भवति।

यथा अभिज्ञानशाकुन्तले चतुर्थाङ्के शापाद् आरभ्य सप्तमाङ्के दुष्यन्तेन शकुन्तलायाः पत्नीरूपेण स्वीकारात् पूर्वपर्यन्तं वृत्तान्तभागः शकुन्तलाविस्मरणादिना विघ्नेन युक्तः अतः स विमर्षसन्धिः भवति।

**ङ) निर्वहणसन्धिः -** सन्धिषु पञ्चमो भवति निर्वहणसन्धिः। तस्य लक्षणं साहित्यदर्पणे -

**"बीजवन्तो मुखाद्यर्था विप्रकीर्णा यथायथम्।**

**एकार्थमुपनीयन्ते यत्र निर्वहणं हि तत्।।"** इति।

निर्वहणम् उपसंहारः उपसंहृतिः इति नामान्तरं केवलम्। यत्र सन्धौ यथायथं यथानियमं विप्रकीर्णाः कविना उपनिबद्धाः बीजवन्तः बीजयुक्ताः मुख्याद्यर्थाः मुखादीनां चतुर्णां सन्धीनां विषयाः एकार्थं केवलमुख्यफलनिमित्तम् उपनीयन्ते प्राप्यन्ते स एव निर्वहणसन्धिः भवति।

यथा वेणीसंहारे कञ्चुकी आगत्य "महाराज, वर्धसे। अयं खलु भीमसेनो दुर्योधनक्षतजारुणीकृतसर्वशरीरो दुर्लक्ष्यव्यक्तिः" इत्यादिना वचनेन द्रौपदीकेशसंयमानादीनां मुखसन्ध्यादिबीजानाम् एकस्मिन् अर्थे योजनम्।

एवमेव शाकुन्तले शकुन्तलायाः परिज्ञानात्परं सप्तमाङ्के यः वृत्तान्तभागः स निर्वहणसन्धेः उदाहरणं भवति। समासेन अत्र पञ्च सन्धयः प्रतिपादिताः।

## ५) प्रस्तावना

साहित्यदर्पणस्य षष्ठपरिच्छेदे दृश्यकाव्यवर्णनावसरे भारती वृत्तिः प्रतिपादिता। भारतीवृत्तेः प्ररोचना, वीथी, प्रहसनम्, आमुखञ्च चत्वारि अङ्गानि। एतेषु आमुखमेव प्रस्तावना। तस्या लक्षणं साहित्यदर्पणे -

**"नटी विदूषको वापि पारिपार्श्विक एव वा।**
**सूत्रधारेण सहिताः संलापं यत्र कुर्वते।।**
**चित्रैर्वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः।**
**आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनापि सा।।"** इति।

नटीविदूषकादिभिः पात्रादिसूचकैः परकृतविषयसूचकैः वा वाक्यैः सूत्रधारेण सह यत्र मिथः आलापः क्रियते तद् एव आमुखम्। तस्य प्रस्तावना इति नामान्तरम्।

अस्याः प्रस्तावनायाः उद्घात्यकः कथोद्घातः प्रयोगातिशयः प्रवर्तकम् अवगलितं चेति पञ्च भेदा भवन्ति। तत्र उद्घात्यकस्य लक्षणम् -

**"पदानि त्वगतार्थानि तदर्थगतये नराः।**
**योजयन्ति पदैरन्यैः स उद्घात्यक उच्यते।।"** इति।

तथाहि मुद्राराक्षसे सूत्रधारः कथयति - "क्रूरग्रहः सकेतुश्चन्द्रमसं पूर्णमण्डलमिदानीम् अभिभवितुमिच्छति बलात्।" इति। ततः परमेव नैपथ्ये - "आः क एष मयि जीवति चन्द्रगुप्तमभिभवितुमिच्छति।" इति चाणक्यः कथयति। एवमत्र उद्घात्यकः। तत्र कथोद्घातस्य लक्षणम् -

**"सूत्रधारस्य वाक्यं वा समादायार्थमस्य वा।**
**भवेत् पात्रप्रवेशश्चेत् कथोद्घातः स उच्यते।।"** इति।

सूत्रधारः रत्नावल्यां पठति "आ एवमेतत् कः सन्देहः" इति तदा यौगन्धरायणः -

"द्वीपादन्यस्मादपि मध्यादपि जलनिधेर्दिशोऽप्यन्तात्।
आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः।।" इति श्लोकं पठित्वा प्रविशति। एवमत्र सूत्रधारस्य वाक्येन पात्रस्य यौगन्धरायणस्य प्रवेशात् कथोद्घातः। तत्र प्रयोगातिशयस्य लक्षणम् -

**"यदि प्रयोग एकस्मिन् प्रयोगोऽन्यः प्रयुज्यते।**
**तेन पात्रप्रवेशश्चेत् प्रयोगातिशयस्तदा।।"** इति।

कस्यचिद् एकस्य विषयस्य आलोचनावसरे यदा विषयन्तारस्य आलोचनेन पात्रस्य प्रवेशः भवति तदा प्रयोगातिशयः। यथा कुन्दमालायां नृत्यप्रयोगाय स्वभार्याह्वानम् इच्छति सूत्रधारः। परन्तु "सीतां वनाय परिकर्षति लक्ष्मणोऽयम्" इति सीतालक्ष्मणयोः प्रवेशः सम्पन्नः। एवं भवति प्रयोगातिशयः। ततः प्रवर्तकस्य लक्षणं कथयति -

**"कालं प्रवृत्तमाश्रित्य सूत्रधृग् यत्र वर्णयेत्।**
**तदाश्रयश्च पात्रस्य प्रवेशस्तत्प्रवर्तकम्।।"** इति।

यस्मिन् आमुखे समुपस्थितस्य कालस्य वसन्तादेः वर्णनं सूत्रधारः विदधाति, तदाश्रित्य रङ्गमञ्चे पात्रस्य सूचना प्रवेशश्च भवति तत्प्रवर्तकम्। यथा आसादितेत्यादिना श्लोकेन वसन्तवर्णने रामप्रवेशः। ततः अवगलितस्य लक्षणं कथयति -

**"यत्रैकत्र समावेशात् कार्यमन्यत् प्रसाध्यते।**
**प्रयोगे खलु तज्ज्ञेयं नाम्नावगलितं बुधैः।।"** इति।

यस्मिन् आमुखे एकस्मिन् विषये सादृश्येन उपन्यासाद् अन्यस्य पात्रस्य प्रवेशो भवति तद् अवगलितम्। यथा अभिज्ञानशाकुन्तले - "तवास्मि गीतरागेण" इत्यादिश्लोकः नटीं प्रति सूत्रधारः कथयति। ततः सादृश्येन उपन्यासाद् राज्ञः दुष्यन्तस्य प्रवेशः। एवं समासेन प्रस्तावनास्वरूपं तद्भेदाश्च उपन्यस्ताः इति शम्।